Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पण्डितश्रीवायुन दनमिश्रकृतः—

अथाऽर्कीविवाहः

[भाषाटीकासहितः]

प० प्रेम
जहांगीराबाद २
बुलन्दशहर (उ०प्र०)

श्रीगणेशाय नमः ॥ अथार्कीविवाहक्रमः ॥ अथ तृतीयमानुषी-विवाहस्य निषिद्धत्वात्तस्मिन् कर्त्तव्ये सत्यर्कीविवाहविधिरुच्यते ॥ तत्र तृतीयमानुषीविवाहनिषेधमाह कश्यपः ॥ तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् ॥ पुत्रपौत्रादिसम्पन्नः कुटुम्बी साग्निको वरः ॥ उद्वहेदिति सिद्ध्यर्थं तृतीया न कदाचन ॥ मोहादज्ञानतो वाऽपि गच्छेत् स्त्रीं यदि मानुषीम् ॥ म्रियते न च सन्देहो गर्गस्य वचनं यथा ॥ वशिष्ठः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थ्याश्च विवाहार्थं तृतीयार्कीं समुद्वहेत् ॥ आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे ॥ शुभे दिने वा पूर्वाह्णे कुर्यादर्कीविवाहकम् ॥

तीसरा विवाह निषिद्ध होने के कारण अर्की विवाह विधि बतला रहे हैं। कश्यप ने तृतीय विवाह का निषेध किया है। यथा 'तृतीयां मानुषीं नैव' इत्यादि। वशिष्ठ ने भी 'चतुर्थ्याश्च' इत्यादि से निषेध किया है॥

ब्राह्मे ॥ ग्रामात् प्राच्यामुदीच्यां वा सुपुष्पफलसंयुताम् ॥ निरीक्ष्य यत्नतोऽधस्तात् स्थण्डिलं रचयेद्बुधः ॥ व्यासः ॥ स्नात्वाऽलङ्कृतवासांसि रत्नगन्धविभूषितः ॥ सुपुष्पफलशाखं च अर्कीगुल्मं समाश्रयेत् ॥ सलक्षणेन कुम्भस्थामर्कीं संस्थाप्य यत्नतः ॥ अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत् पुरा ॥ उभौ गोत्रविभिन्नं तं शान्तं दान्तं दयान्वितम् ॥ आचार्येण स्वयं भाव्यं दत्तां सूर्येण कन्यकाम् ॥

अर्कीसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ॥ नान्दीश्राद्धं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिरण्येन अष्टवर्गान् प्रपूजयेत् ॥ पूजयेन्मधुपर्केण आचार्यो रत्नतो वरम् ॥ यज्ञोपवीतवस्त्रं च हस्तकर्णादिभूषितम् ॥ उष्णीषं गन्धमाल्यादि वराय च प्रदापयेत् ॥ ब्रह्मपुराणे ॥ यथाविधीति रुच्येत इत्यस्याऽनन्तरं क्रमः ॥ कृत्वाऽर्कं पुरतस्तिष्ठन् प्रार्थयेत्तु द्विजोत्तमान् ॥ त्रिलोकवासिन् ! सप्ताश्व ! छायया सहिते रवे ! ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥ तत्राध्यारोप्य देवेशं छायया सहितं रविम् ॥ वस्त्रैर्माल्यैस्तथा गन्धैस्तन्मन्त्रेण प्रपूजयेत् ॥ तन्मन्त्रः—आकृष्णेनेति ॥ अन्यच्च ॥ श्वेतवस्त्रेण संवेष्ट्य तथा कार्पासतन्तुभिः ॥ गन्ध-पुष्पैः समभ्यर्च्य तल्लिङ्गैरभिषिच्यताम् ॥ गुडौदनं तु नैवेद्यं ताम्बूलं च समर्पयेत् ॥ व्यासः ॥ अर्कीप्रदक्षिणं कुर्वन् जपेन्मन्त्रमिमं बुधः ॥ मम प्रीतिकरा येयं त्वया सृष्टा पुरातनी ॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु ॥ पुनः प्रदक्षिणं कृत्वा मन्त्रेणाऽनेन मन्त्रवित् ॥ नमस्ते मङ्गले ! देवि ! नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सवितुरात्मजे ! ॥ त्राहि मां कृपया देवि ! पत्नी त्वं मे इहागता ॥ अर्कि ! त्वं ब्रह्मणा सृष्टा सर्वप्राणिहिताय च ॥ वृक्षाणामादिभूता त्वं देवानां प्रीतिवर्धिनी ॥ तृतीयोद्वाहजं पापं मृत्युं चाऽऽशु निवारय ॥ ततश्च कन्यावरणात् त्रिपुरुषं कुलमुच्चरेत् ॥ आदित्यः सविता चार्कः पुत्री पौत्री प्रपौत्रिका ॥ गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत् ॥ अन्यच्च ॥ वरः कश्यपगोत्रश्चेत्तदाचार्यः स्वपूर्वजान् ॥ उच्चरेन्मम पुत्रीति स्वगोत्रैः सह तद्विधिः ॥ व्यासः ॥ सुमुहूर्तेऽर्कीं निरीक्ष्य स्वस्तिसूक्तमुदीरयेत् ॥ स्वति न ऽइन्द्रेति पठेत् ॥ आशिषश्च ततः कुर्यादाचार्यप्रमुखैर्द्विजैः ॥ अथाचार्यः समाहूय विधिना तन्मुखाच्च ताम् ॥ परिगृह्य ततो होमं गृह्योक्तविधिनाऽऽचरेत् ॥ अर्कीदानमन्त्रस्तु ॥ अर्ककन्यामिमां विप्र ! यथाशक्ति विभूषिताम् ॥ अञ्जल्यक्षतकर्माणि कृत्वा कङ्कणपूर्वकम् ॥ यावत् पञ्चावृतं सूत्रमर्कीवृक्षे प्रवेष्टयेत् ॥ पञ्चीकृतं पुनः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूत्रं स्कन्धे बध्नाति मन्त्रतः ॥ स्वशाखोक्तेन मन्त्रेण गायत्र्या चाऽथवा जपेत् ॥ बृहत्सामेति मन्त्रेण सूत्ररक्षां प्रकल्पयेत् ॥ अर्क्याश्च पुरतः पश्चाद्दक्षिणोत्तरयोस्तथा ॥ आग्नेयादिक्रमेणैव विदिक्षु अपि चैव हि ॥ अष्टौ कुम्भान् प्रतिष्ठाप्य क्रमेणैव यथाविधि ॥ प्रस्रवप्रतिकुम्भं च त्रिभिः सूत्रेण वेष्टयेत् ॥ हरिद्रागन्धसंयुक्तान् पूरयेच्छीतलैर्जलैः ॥ पञ्चपल्लवसंयुक्तान् फलरत्नसमन्वितान् ॥ सर्वौषधिसमायुक्तान् पूर्ण-पात्रसमन्वितान् ॥ प्रतिकुम्भे महाविष्णुं सम्पूज्य परमेश्वरम् ॥ पाद्यार्घ्यादीनि नैवेद्यं कुर्यान्नाम्नैव मन्त्रवित् ॥ कुम्भोदकैर्वरमर्कीं वारुणैरभिषिञ्चयेत् ॥

ब्रह्मपुराण में 'ग्रामात् प्राच्यां' इत्यादि विवाह क्रम बतलाया है। व्यास ने भी 'स्नात्वाऽलङ्कृतवासांसि' इत्यादि श्लोकों से क्रम बतलाया है। ग्राम के पूर्व या उत्तर फूल और फल से युक्त मन्दार वृक्ष के नीचे शुद्ध स्थण्डिल बनावे। यजमान स्नान करके, शुद्ध वस्त्र पहिन कर, अर्की वृक्ष के नीचे शुद्ध आसन पर बैठ कर, स्वस्तिपुण्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हवाचन, नान्दी श्राद्धादि पञ्चाङ्ग विधि करके सुवर्ण से अष्टवर्गों का पूजन, मधुपर्क से आचार्य पूजन, इत्यादि अनुक्रम व्यास ने बतलाया है ॥

अत्र होमप्रकारः शौनकेन दर्शितः ।

तृतीये तु विवाहे च सम्प्राप्ते पुरुषस्य तु ॥ अर्कीविवाहं वक्ष्यामि शौनकोक्तविधानतः ॥ अर्कीसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ॥ नान्दीश्राद्धं प्रकुर्वीत आचार्यं वरयेत् ततः ॥ अर्कीमभ्यर्च्य सौर्यां च गन्ध-पुष्पा-ऽक्षतादिभिः ॥ सौर्या एव च सूर्यश्च आकृष्णेन ऋचेन च ॥ स्वयं चालङ्कृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः ॥ अर्कस्योत्तरदेशे तु स्थण्डिलं कारयेत् ततः ॥ उल्लेखनादिकं कृत्वा अग्निं संस्थापयेत् ततः ॥ ब्रह्मासनादिकं कृत्वा समन्वारब्ध एतया (एतया=अर्क-कन्यया) ॥ संस्कृताज्यं स्रुवेणैव आघारान्तमतः परम् ॥ आज्याहुतिं च जुहुयात् संगोभिरनयैकया ॥ यस्मै त्वाकामकामश्च एकया च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः परम् ॥ व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्धवेत् ॥ पर्यवेश-नपर्यन्तमयाश्चेत्यादिकं क्रमात् ॥ प्रार्थनामन्त्रादि विशेषमाह व्यासः ॥ पुनः प्रदक्षिणं कृत्वा मन्त्रमेतमुदीरयेत् ॥ मया कृतमिदं कर्म स्थावरेण जरायुणा ॥ अर्कापत्यानि नो देहि तत्सर्वं क्षन्तुमर्हसि ॥ इत्युक्त्वा शान्तिसूक्तं च जप्त्वा च विसृजेत् पुनः ॥ गोयुग्मं दक्षिणां दद्यादा-चार्याय च भक्तितः ॥ इतरेभ्योऽपि विप्रेभ्यो दक्षिणां चापि शक्तितः ॥ तत्सर्वं गुरवे दद्यादन्ते ब्राह्मणभोजनम् ॥ एवमर्कीं समभ्यर्च्य विधिना मानुषीं पुरा ॥ उद्वहेदन्यथा नैव पुत्रपौत्राभिवृद्धिमान् ॥ एवमेतद्द्विज-श्रेष्ठ ! विधिना सम्यगुद्वहेत् ॥ धन-धान्य-समृद्धिं च इच्छाभीष्टवरं व्रजेत् ॥ इति अर्कीविवाहक्रमः ॥

इस अर्कीविवाह में होम का प्रकार शौनक ने बतलाया है। 'तृतीये तु विवाहे च सम्प्राप्ते' इत्यादि ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशाय नमः ॥ अथार्कीविवाहप्रयोगः ॥ अत्र क्रियमाण-विवाहात् प्राक् चतुर्दिनादिव्यवहिते रवि-शनिवासरे हस्तनक्षत्रे वा शुभ-तिथ्यादिदिने ग्रामात् प्राच्यां उदीच्यां वा पुष्पफलयुतार्कीगुल्मं प्रयाज्य तदधोभागे पुरतः स्थण्डिलं विधाय अर्कीपश्चिमतो यजमानः उप-विश्य ॥ गुल्मस्य समन्तात् प्रागाद्यष्टदिक्षु तण्डुलेनाऽष्टदलानि विरच्य ॥ आचम्य, प्राणानायम्य ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च।सम्प्रोक्ष्य ॥ हस्ते अक्षत-पुष्पाणि गृहीत्वा आनो भद्रादीन् मङ्गलमन्त्रान् पठेत् ॥ देशकालौ सङ्कीर्त्य० अमुक-गोत्रः अमुकशर्मा मम तृतीयमानुषीविवाहजन्यदोषपरिहारार्थं शुभ-फलप्राप्त्यर्थं च अर्कीविवाहं करिष्ये ॥ तदङ्गविहितनिर्विघ्नतार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुष्यमन्त्रजपं नान्दीश्राद्धं च करिष्ये ॥ एतानि कर्माणि ग्रहशान्त्यनुसारेण कृत्वा ॥ कर्मार्थं स्वकुलाचार्यं वृत्वा ॥ कन्यापिता यथा सूर्यो देवानां च प्रजापतिः ॥ तथा त्वर्कप्रदानार्थमाचार्यत्वं कुरु द्विज ! ॥ अपरमर्कीदानाचार्यं वृणुयात् ॥

अर्कीविवाह प्रयोग लिखते हैं—विवाह के चार दिन पहले रवि या शनिवार, हस्तनक्षत्र अथवा शुभ तिथि में गाँव के पूर्व या उत्तर दिशा में पुष्प फल से युक्त मन्दार वृक्ष को लगावे। उसके नीचे शुद्ध मृत्तिका की एक हाथ लम्बी चौड़ी वेदी बनावे। यजमान मन्दार वृक्ष के पश्चिम तरफ बैठकर वृक्ष के चारो तरफ पूर्वादि आठों दिशाओं में चावल से अष्टदल बनावे। 'आचम्य प्राणानायम्य अपवित्रः पवित्रो वा' से अपने ऊपर पूजा सामग्री पर जल छिड़ककर हाथ में पुष्प लेकर 'आनो भद्रा' पढ़े। जलाक्षत द्रव्य लेकर प्रधान सङ्कल्प करे। मातृका पूजनादि ग्रहशान्ति के अनुसार करे। पश्चात् अपने कुल के आचार्य (पुरोहित) का वरण करके कन्या पिता 'यथा सूर्यो०' इससे प्रार्थना करे ॥

ततो वरः अर्कीगुल्मस्याऽग्रे तण्डुलाष्टदले महीद्यौरिति क्रमेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्णपात्रनिधानान्तं कलशं प्रतिष्ठाप्य ॥ तस्योपरि स्वर्णमयीं छायया सहितां अर्कप्रतिमामग्न्युत्तारणपूर्वकं प्रतिष्ठाप्य ॥ वस्त्रोपवस्त्राणि समर्प्य ॥ ॐ आकृष्णेनेति षोडशोपचारैः सम्पूज्य गुडौदननैवेद्यं दत्त्वा पूजनान्ते प्रार्थयेत् ॥ त्रिलोकवासिन् ! सप्ताश्व ! छायया सहितो रवे ! ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥ १ ॥ ततो अर्कीमापो हि ष्ठेति तृचेन शुद्धजलेनाभिषिच्य ॥ तत्र मन्त्रः ॥ ॐ आपो॒ हि ष्ठा म॑यो॒ भुव॒स्ता न॑ ऽऊ॒र्ज्जे द॑धातन ॥ म॒हेर॑णाय॒ चक्ष॑से ॥ १ ॥ ॐ यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयतेह न॑ः ॥ उ॒श॒ती॑रिव मा॒तर॑ः ॥२॥ ॐ तस्मा॒ ऽअर॑ङ्गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ ॥ आपो॑ ज॒नय॑था च न॑ः ॥ ३ ॥ इत्यभिषेकः ॥ ततः षोडशोपचारैः सम्पूज्य प्रदक्षिणां कुर्यात् ॥ तत्र मन्त्रः ॥ मम प्रीतिकरा या वै त्वया सृष्टा पुरातनी ॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु ॥ इत्येका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रदक्षिणा ॥ नमस्ते मङ्गले देवि! नमः सवितुरात्मजे! ॥ रक्ष मां कृपया शश्वत् पत्नीत्वं मे इहाऽऽगता ॥ इति द्वितीयप्रदक्षिणा ॥

इसके बाद वृक्ष के सामने चावल के अष्टदल पर 'मही द्यौ' इत्यादि पूर्णपात्र पर्यन्त कलशस्थापन कर, उसके ऊपर सुवर्ण की छाया सहित सूर्य की प्रतिमा अग्न्युत्तारण पूर्वक स्थापन कर वस्त्रोपवस्त्र समर्पण कर 'आकृष्णेन०' इस मन्त्र से षोडशोपचार पूजन कर, गुडौदन नैवेद्य देकर 'त्रिलोकवासिन्०' इस मंत्र से प्रार्थना करे। इस के बाद 'आपो हि ष्ठा' तीन मन्त्र से शुद्ध जल लेकर मन्दार वृक्ष का अभिषेक करे। और षोडशोपचार पूजन कर 'मम प्रीतिकरा०' इस मन्त्र से प्रदक्षिणा करे। 'नमस्ते मङ्गले०' इससे द्वितीय प्रदक्षिणा करे ॥

ततोऽर्कीं प्रार्थयेत् ॥ अर्की त्वं ब्रह्मणा सृष्टा सर्वप्राणिहिताय च ॥ वृक्षाणामादिभूता त्वं देवानां प्रीतिवर्धिनी ॥ सर्वारिप्रहरा नित्यं सर्वमङ्गलदायिनी ॥ तृतीयोद्वाहजं पापं मृत्युं चाऽऽशु विनाशय ॥ ततो दानाचार्यः देशकालौ सङ्कीर्त्य० अद्याऽर्कीविवाहार्थमागतं वरं मधुपर्के-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णाऽर्चयिष्ये ॥ ततः स्वशाखोक्तमधुपर्कं कृत्वा ॥ ततो वरः स्थण्डिले पञ्चभूसंस्कारपूर्वकं अग्निं प्रतिष्ठाप्य ॥

इसके बाद 'अर्की त्वं०' इससे प्रार्थना करे। तदनन्तर दानाचार्य 'देशकालौ०' इससे संकल्प कर अपनी शाखा के अनुसार मधुपर्क पूजन करे। वर स्थण्डिल पर पंचभूसंस्कार कर अग्निस्थापन करे ॥

अर्कीवरान्तराले अन्तःपटं धृत्वा कर्माचार्यादि ब्राह्मणैर्मङ्गल-मन्त्रान् पठेत् ॥ ॐ प्रतिष्ठेत्युक्त्वा उत्तरतः अन्तःपटं निःसार्य ॥ आचार्यादिब्राह्मणाः ॥ ॐ स्वति न ऽइन्द्रेति मङ्गलसूक्तं पठेयुः ॥ ततः ॥ ॐ जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्ति पावा ॥ शतं च जीव शरदः सुवर्चा रयिं च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः ॥ अथोत्तरीयम् ॥ ॐ या ऽअकृन्तन्नवयं या ऽअत-न्वत ॥ याश्च देवीस्तन्तूनभितो ततन्थ ॥ तास्त्वा देवीर्जरसे संव्य-यस्वायुष्मतीदं परिधत्स्व वासः ॥ इत्यर्क्यै वस्त्रोपवस्त्रौ परिधापयेत् ॥ ६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो वरः स्वयं परिधत्ते ॥ ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि ॥ शतं च जीवामि शरदः पुरुची रायस्पोषमभिसंव्ययिष्ये ॥ आचमनम् ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ आचमनम् ॥

अर्की, और वर के बीच में अन्तःपट करके ब्राह्मण लोग मंगल मन्त्रों को पढ़ें। 'ॐ प्रतिष्ठ' यह कह कर अन्तःपट को उत्तर की तरफ से निकाले। आचार्यादि ब्राह्मण 'स्वस्ति न इन्द्र०' यह मङ्गल सूत्र पढ़ें। अर्कीवृक्ष पर 'जरां गच्छ परिधत्स्व वासः' इससे तथा 'या अकृतन्वयं०' इससे वस्त्रोपवस्त्र देकर, वर 'परिधास्यै०' इससे स्वयं वस्त्र पहिरे। आचमन कर, यज्ञोपवीत धारण कर आचमन करे ॥

ॐ यशसा मा द्यावा पृथिवी यशसेन्द्रा बृहस्पतिः ॥ यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् ॥ आचमनम् ॥ समञ्जन्त्विति अर्कीं निरीक्ष्य तत्र मन्त्रः ॥ ॐ समञ्जन्तु विश्वेदेवा समापोहृदयानि नौ सं मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ ॥ ॐ यदा बध्नन्निति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरहस्ते माङ्गलिकतन्तुं बध्नीयात् ॥ तत्र मन्त्रः ॥ ॐ यदा बध्नन् दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ॥ तन्म ऽआबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ ततो गायत्र्या अर्कीवरयोः सूत्रमावेष्टय ॥ ॐ तत्स० ॥ ततो दानाचार्य उदङ्मुखोपविश्य ॥ देशकालौ स्मृत्वा० श्रीपरमेश्वरप्रीत्यर्थं अर्कीकन्यादानं करिष्ये ॥

'यशसा मा द्यावा०' से दुपट्टा धारण करे। पुनः आचमन करे। 'समञ्जन्तु०' इस मन्त्र से अर्की को निरीक्षण करे। 'यदा बध्नन्०' इस मन्त्र से मङ्गलतन्तु वर अपने हाथ में बाँधे। इसके बाद दानाचार्य अर्की वर को सूत्र से गायत्री मन्त्र से वेष्टन करे। स्वयं उत्तर मुँह बैठ कर 'देशकालौ०' इत्यादि पढ़कर संकल्प करे ॥

ततो वरहस्ते शिवा आपः सन्तु, इति जलादिकं दत्त्वा ॥ वरस्य गोत्रोच्चारणं कुर्यात् ॥ तद्यथा ॥ अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्रपौत्राय । अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पौत्राय । अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पुत्राय । अमुकगोत्राया-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽमुकशर्मणे वराय ॥ ततोऽर्कीपक्षे ॥ काश्यपगोत्रस्य त्रिप्रवरस्य आदित्यस्य प्रपौत्रीम् । काश्यपगोत्रस्य त्रिप्रवरस्य सवितुः पौत्रीम् । काश्यपगोत्रस्य त्रिप्रवरस्य अर्कस्य पुत्रीम् ॥ काश्यपगोत्रोत्पन्नां त्रिप्रवरां अर्कीनाम्नीमिमां कन्यां सूर्यदैवत्यां तव मानुषीविवाहदोषनिरासार्थं भार्यात्वेन तुभ्यमहं सम्प्रददे ॥ अनेनाऽर्कीशाखां वरहस्ते दत्वा तदुपरि सकुशोदकं निषिञ्चेत् ॥ प्रार्थना ॥ अर्की कन्यामिमां विप्र ! यथाशक्ति विभूषिताम् ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र ! समाश्रय ॥

वर के हाथ में 'शिवा आपः सन्तु' इत्यादि से जलादि देकर गोत्रोच्चार करे। 'कश्यपगोत्रस्य' यहाँ से लेकर 'भार्यात्वेन तुभ्यमहं संप्रददे' तक कह कर अर्की शाखा को वर के हाथ में देकर कुशोदक से निषिंचन करे। 'अर्कीं कन्यां०' इस से प्रार्थना करे ॥

ततोऽर्घ्युपरि गन्धाक्षतपुष्पोदकपूर्णाञ्जलींस्त्रीन् समर्पयेत् ॥ तत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्राः ॥ ॐ यज्ञो मे कामः समृध्यताम् । इति प्रथमाञ्जलिः ॥ ॐ धर्मो मे कामः समृध्यताम् ॥ इति द्वितीयाञ्जलिः ॥ ॐ यशो मे कामः समृध्यताम् ॥ इति तृतीयाञ्जलिः ॥ ततोऽर्कीगुल्मे ॥ ॐ परि त्वा गिर्वणो गिर ऽइमा भवन्तु विश्वतः ॥ वृद्धायुमनुवृद्ध्यो जुष्टा भवन्तु जुष्टयः ॥ १ ॥ इन्द्रस्य स्यूरसीन्द्र ध्रुवो ऽसि ॥ ऐन्द्रमसि वैश्वदेवमसि ॥ २ ॥ इत्यनुवाकेन वेष्टितं सूत्रं निष्कास्य पञ्चगुणं कृत्वा तत्र हरिद्राखण्डं बद्धा तत्कङ्कणं बृहत्सामेति मन्त्रेण वामशाखायां बध्नीयात् ॥ तत्र मन्त्रः ॥ ॐ बृहत्साम नक्षत्रमृदृग्वृष्टयं त्रिष्टुभौ जशुभितमुग्रवीरम् ॥ इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वा तनु सगरेण रक्ष इति ॥

तदनन्तर अर्की के ऊपर गन्ध, अक्षत, पुष्प, जल, लेकर तीन अञ्जलि छोड़े। 'यज्ञो मे कामः' इस से पहली अञ्जलि, 'धर्मो मे कामः०' इस से द्वितीय अञ्जलि, 'यशो मे कामः' इस से तृतीय अञ्जलि दे। 'परि त्वा गिर्वणो०' इस मन्त्र से अर्की में लपेटे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हुए सूत्र को निकाल कर उसको पाँच गुणा करके उसमें हल्दी का टुकड़ा बाँध कर कंकण बनावे। 'बृहत्साम०' इस मन्त्र से उस कंकण को अर्की की बाँयी शाखा में बाँधे ॥

ततोऽर्कीदिग्विदिक्षु कृताष्टदलेषु महीद्यौरित्यादिक्रमेणाऽष्टौ कुम्भान् संस्थाप्य (केचित्प्रागादिचतुर्दिक्षु चतुरः कुम्भान् संस्थाप्य सूत्रेणाऽऽवेष्टय चन्दनप्रक्षेपणेऽष्टगन्धं क्षिप्त्वा पूर्णपात्रं निधाय तेषु नाम्ना विष्णुमावाह्य षोडशोपचारैः सम्पूजयेत् ॥ (वरः देशकालौ सङ्कीर्त्य० अमुकगोत्रः अमुकशर्माऽहं अर्कीविवाहाङ्गभूतं होमं करिष्ये ॥ ततो ब्रह्मासनादि आज्यभागान्तं चरुवर्जं कुशकण्डिकां सम्पाद्य ॥

तदनन्तर अर्की के चारो तरफ बने हुए अष्टदल पर 'मही द्यौरित्यादि' मन्त्रों से क्रम से आठ कलश स्थापन करे। उसके ऊपर विष्णु का आवाहन पूजन करे। (कोई चारो दिशा में चार ही कलश स्थापन करते हैं) वर 'देशकालौ०' से हवन का संकल्प करे। चरु को छोड़कर पूरी कुशकण्डिका करे ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्राघारावाज्यभागौ हुत्वा ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय० ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये० ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय० ॥ ॐ सङ्गोभिराङ्गिरसो नक्षत्रमाणो भगऽइवे दर्यमणं निनाय ॥ जनेमित्रोन दम्पती अनक्ति बृहस्पतेवाजया शूँरिवाजौ स्वाहा ॥ इदं बृहस्पतये न मम ॥ ॐ यस्मै त्वा कामकामाय व्वयं सम्म्राड्यजामहे ॥ तामस्मभ्यं कामं दत्वा यथेदं घृतं पिब स्वाहा ॥ इदमग्नये न मम ॥ ॐ भू० स्वाहा ॥ इदमग्नये० ॥ ॐ भुवः स्वाहा ॥ इदं वायवे० ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय० ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ इदं प्रजापतये० ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते० ॥ ॐ भूः स्वाहा ॥ इदमग्नये० ॥ ॐ भुवः स्वाहा ॥ इदं वायवे० ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय० ॥ ॐ त्वन्नोऽअग्ने० ॥ इदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्नी-वरुणाभ्यां० ॥ ॐ स त्वन्नोऽअग्ने० ॥ इदमग्नीवरुणाभ्यां० ॥ ॐ अयाश्चाग्ने० ॥ इदमग्नये अयसे० ॥ ॐ ये ते शतं वरुणं ये० ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च० ॥ ॐ उदुत्तमं वरुण० ॥ इदं वरुणायादित्यायादितये न मम ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥ संस्रवप्राशनम् ॥ आचमनम् ॥ पवित्राभ्यां मार्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ अग्नेः पश्चात् प्रणीताविमोकः ॥ ॐ आपः शिवेति उपयमनकुशेन मार्जनम् ॥

'प्रजापतये स्वाहा०' इससे आघारादि आज्य भाग देकर 'सङ्गोभिराङ्गिरसो०' 'यस्मै त्वा०' इससे आहुति देकर 'भूः स्वाहा' इत्यादि की आहुति दे। संस्रवप्राशनादि पूर्णपात्र प्रणीता विमोक पर्यन्त करे ॥

ततोऽर्कीं प्रार्थयेत् ॥ मया कृतमिदं कर्म स्थावरेषु जरायुणा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्कापत्यानि नो देहि तत्सर्वं क्षन्तुमर्हसि ॥ तत आचार्यौ गन्धादिभिः सम्पूज्य ॥ ताभ्यां च गोयुग्मं दद्यात् तैराशिषो गृहीत्वा ॥ पूजोपकरणादिकमाचार्याय दत्वा ॥ स्थापितदेवताग्निं यान्तु देवेति, गच्छ गच्छ सुरश्रेष्ठेति च विसृजेत् ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥ इति नत्वा ॥ शान्तिसूक्तं ऋचं वाचं अध्यायं पठेत् ॥ स्थापितकलशोदकेनाऽर्कीवरयो आपोहिष्ठेत्यभिषेकः ॥ धृतवस्त्राण्याचार्यायं दद्यात् ॥ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ इति पठेत् ॥

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ० प्र०)

इत्यर्कीविवाहः समाप्तः ।

'मया कृतमिदं०' इससे अर्की की प्रार्थना करे। इसके बाद दोनों आचार्यों का गन्धादिक से पूजनकर गोदान देकर आशीर्वाद ग्रहण करे। तदनन्तर पूजा के उपकरण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection